# Shiva Puja Stava

# શિવપૂજાસ્તવઃ

## Document Information

Text title : Shiva Puja StavaH

File name : shivapUjAstavaH.itx

Category : shiva, pUjA

Location : doc_shiva

Author : jnAnashambhushivAchArya

Transliterated by : Dominic Goodall

Proofread by : Dominic Goodall, Ruma Dewan

Latest update : January 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 7, 2022

*sanskritdocuments.org*

# શિવપૂજાસ્તવઃ

પ્રાતશ્શઙ્કરચિન્તનસ્નપનસંસેકાસુસંરોધનૈ-
    સ્સન્ધ્યાસંસ્મૃતિમાર્જનાઘશમનોપસ્થાનસન્તર્પણૈઃ ।
દ્વારસ્યાર્ચનયાગધામગતવિઘ્નોદ્વાસનાદ્યૈઃ પ્રભો-
    ર્યશ્શ્રીમાન્યજનં કરોતિ ભવતસ્તસ્યૈવ સિદ્ધિદ્વયમ્ ॥ ૧॥

એકૈવાર્થત ઈશશક્તિરમિતા યાઽનેકરૂપા શિવા
    કાલોપાધિવશાદ્વિજાસ્ત્વનુદિનં બ્રાહ્મ્યાદિરૂપેણ તામ્ ।
ધ્યાયન્ત્યત્ર તુ નિર્મલાત્મશિવયોસ્સન્ધિશ્ચ શૈવી પરા
    સન્ધ્યાતશ્શિવ એવ સાધકવરૈર્ધ્યેયઃ સદા નિર્મલઃ ॥ ૨॥

પ્રાતસ્સ્મરામિ હૃદયાબ્જખમધ્યસંસ્થં
    ચન્દ્રાર્કમાર્ગવિરહોદિતચિત્સ્વરૂપમ્ ।
ધ્યેયં સદા મુનિવરૈરપવર્ગસિદ્ધ્યૈ
    વિશ્વાત્મકં સદસદન્તમનન્તમીશમ્ ॥ ૩॥

મધ્યન્દિને શતસહસ્રનિશાકરાભં
    વિશ્વેશ્વરં પરમકારણમપ્રમેયમ્ ।
શમ્ભું સદોદિતમમાયવિયત્સ્વરૂપં
    કોદણ્ડમધ્યનિલયં નિયતં સ્મરામિ ॥ ૪॥

બ્રહ્માક્ષરં નિશિમુખેઽમૃતસાગરાભં
    વિશ્વાધિપં શિવમનૂત્થિતનાદસંસ્થમ્ ।
બોધામૃતં કરણકારણકાર્યહીનં
    તં બ્રહ્મરન્ધ્રનિલયં નિયતં સ્મરામિ ॥ ૫॥

તેજોનિધાનમચલં શિવમર્ધરાત્રે
    નિત્યં નિરસ્તવિષયૈઃ પરમાર્થદૃગ્ભિઃ ।
વિજ્ઞેયમવ્યયમચિન્ત્યમભાવનીય-
    મુન્મન્યતીતવિષયં સતતં સ્મરામિ ॥ ૬॥

ક્ષ્માદિગ્રન્થ્યન્તતત્ત્વક્રમનિહિતપદાક્રાન્તસંશુદ્ધવિદ્યા
    તત્ત્વાન્તવ્યાપિસાદાશિવવિશદપદં ભાવયન્નાત્મરૂપમ્ ।
શૈવજ્ઞાનપ્રસિદ્ધપ્રવરવિધિગતાશેષસત્કૃત્યકારી
    જીવં હૃદ્યેવ કુર્યાદ્રવિશશિદહનવ્યોમશક્ત્યન્તરસ્થમ્ ॥ ૭॥

આયામૈશ્શ્વનસ્ય ભૌતિકમલં દેહં કલાભિસ્સુધીર્યઃ
    પઞ્ચાધ્વવિસર્પિણીભિરનિશં સંશોદ્ધ્ય તચ્છમ્બરૈઃ ।
મન્ત્રાલઙ્કૃતદેહભૃન્નિશિ દિવા સન્ધ્યાસુ સન્તોષય-
    ન્નર્ચાહોમસમાધિભિશ્શિવમસૌ સંયાતિ શૈવં પદમ્ ॥ ૮॥

ય એષ દેવો મહતો મહીયાનણોરણીયાન્ભવભીરુભિસ્સઃ ।
જ્ઞેયશ્શિવસ્સર્વગતસ્શરીરે ધ્યેયસ્સ પૂજ્યશ્શિવલિઙ્ગમધ્યે ॥ ૯॥

હૃત્પદ્માખ્યશિવાલયે મનસિજે તત્કર્ણિકાખ્યે ક્રિયા-
    પીઠે જ્ઞાનમયં વિશુદ્ધમનસા સંસ્થાપ્ય નાદાત્મના ।
લિઙ્ગં તચ્ચ સુધામયેન પયસા સંસ્નાપ્ય સમ્યક્પુનઃ
    વૈરાગ્યેણ ચ ચન્દનેન વસુભિઃ પુષ્પૈરહિંસાદિભિઃ ॥ ૧૦॥

પ્રાણાયામભવેન ધૂપવિધિના ચિદ્દીપદાનેન યઃ
    પ્રત્યાહારમયેન સોમહવિષા સૌષુમ્નજાપેન ચ ।
તચ્ચિત્તે બહુધારણાભિરમલધ્યાનોદ્ભવૈર્ભૂષણૈ-
    સ્તત્સામ્યાણુનિવેદનેન યજતે ધન્યસ્સ એવામલઃ ॥ ૧૧॥

ચન્દ્રસ્રાવિસુધામયેન હવિષા નાભિસ્થકુણ્ડેઽનલં
    સન્તર્પ્યેશમયં શિવાસ્પદગતવ્યોમ્નિ સ્થિતે સર્વગે ।
કન્દોદ્ભૂતશિવાણુનાદશિખયા વૃત્ત્યાત્મસંવેદનં
    શૈવે જ્યોતિષિ યઃ કરોતિ પુરુષો મુક્તસ્સ એવાક્ષયઃ ॥ ૧૨॥

યથાવદાત્માશ્રયવસ્તુમન્ત્રસ્વાયત્તલિઙ્ગાદિષુ શોધિતેષુ ।
સિદ્ધાન્તમાર્ગસ્થિતસાધકાનાં ત્વત્પૂજનં નાત્ર વિલોમતોઽસ્તુ ॥ ૧૩॥

ધારિકાભિધશક્તિબીજમનન્તપઙ્કજકુડ્મલં
    પુણ્યબોધવિરાગભૂતિપદં વિલોમચતુષ્ટયમ્ ।
ગાત્રકં છદનદ્વયં કમલં સકેસરકર્ણિકં
    શક્તિમણ્ડલસઙ્ઘયુક્તમહં નમામિ શિવાસનમ્ ॥ ૧૪॥

પૃથ્વીકન્દં કાલતત્ત્વાન્તનાલં લોકૌઘં તત્કણ્ટકં ભાવસૂત્રમ્ । (લોકૌટ્ટં)
ગ્રન્થિગ્રન્થિં શુદ્ધવિદ્યાસરોજં વિદ્યેશાનારૂઢપત્રાષ્ટકં ચ ॥ ૧૫॥

વામાદિશક્તિગતકેસરકર્ણિકાઢ્ય-
    મર્કાદિબિમ્બસહિતં વરયોગપીઠમ્ ।
તત્ર સ્થિતં હૃદયમન્ત્રગતાત્મમન્ત્ર
    મૂર્તિં ચ બિન્દુગતમીશમહં નમામિ ॥ ૧૬॥

તત્કન્દં શતકોટિયોજનમિતં નાલં પરાર્ધાન્તકં
    ગ્રન્થિઃ કોટિપરાર્ધપશ્ચિમસહસ્રોઽબ્જં ચ તલ્લક્ષકમ્ ।
મૂર્તિસ્તસ્ય ચ કોટિરીશ્વરમયી તસ્યાર્બુદસ્યાર્બુદા-
    મ્ભોજં મન્ત્રમયં સદાશિવવપુસ્તદ્ધાનમેયસ્શિવઃ ॥ ૧૭॥

યસ્યામૌષધભૂષણધ્વનિમયી મૂર્તિઃ પરા બૈન્દવી
    ધ્યેયા શઙ્કરમન્ત્રતન્ત્રનિરતૈર્જ્ઞાનક્રિયાઙ્ગી શિવા ।
સર્વૈશ્વર્યસુખપ્રદા નિરુપમા સાદાશિવી નિર્મલા
    નાદાખ્યાય સદાશિવાય મહતે શાન્તાય તસ્મૈ નમઃ ॥ ૧૮॥

ધ્યેયસ્સદા ગગનમણ્ડલમધ્યવર્તી
    નિર્વિઘ્નશુદ્ધશિવયોગિહૃદમ્બુજસ્થઃ ।
ઈશોર્ધ્વનિષ્કલશિવાન્તવપુસ્સદેશો
    બિન્દુસ્સ્વરોદ્ભવકલાભુવનેશગર્ભઃ ॥ ૧૯॥

યોઽસાવીશાનમૂર્ધા નરમુખકમલોઽઘોરહૃદ્વામગુહ્ય-
    સ્સદ્યોમૂર્તિઃ પુરેશાનનહૃદયપદષ્ષડ્વિધાધ્વસ્વરૂપઃ ।
ભૂતામ્ભોરાશિસિદ્ધિસ્મરભુજગકલાક્લિપ્તદેહઃ ક્રિયેચ્છા
    દૃગ્માસાર્ધામ્બકં તં કબિલગતમહં નૌમિ વિદ્યાશરીરમ્ ॥ ૨૦॥

શ્વેતાસૃક્કૃષ્ણપીતસ્ફટિકશશિસુવર્ણારુણાલયગ્નિવર્ણૈ-
    ર્બ્રહ્માઙ્ગૈર્વ્યક્તમૂર્તિર્ભવહરશિવસંયોગતસ્સ્ફાટિકાભઃ ।
ઐક્યાન્મન્ત્રાર્થયોરિત્યખિલશિવમતેષ્વાહ સર્વાર્થહેતુ-
    ર્વક્ત્રાણાં વર્ણભેદશ્ચિદચિદધિપતેશ્ચિત્રમેતત્સ્વરૂપમ્ ॥ ૨૧॥

ઈશાનેન વિયન્મયેન ધવલપ્રખ્યેન સર્વપ્રભો-
    ર્વ્યાપ્તં વક્ત્રચતુષ્ટયં પુરુષહૃદ્ગુહ્યાજમન્ત્રાત્મકમ્ ।
તેનેદં ધવલપ્રભં શિવવિદઃ પૂર્વાદિકાષ્ઠાભૃતાં
    વર્ણાનુગ્રહહેતુતઃ પ્રતિમુખં પીતાદિવર્ણં વિદુઃ ॥ ૨૨॥

ઈશતત્પુરુષાઘોરવામાજવદનં શિવમ્ ।
બાલયૌવનવૃદ્ધસ્ત્રીનરાકારં નમામ્યહમ્ ॥ ૨૩॥

ત્રિશૂલખટ્વાઙ્ગધરસ્સશક્તિર્વરાબ્જહસ્તોઽભયપાણિરીશઃ ।
સેન્દીવરાહિર્ડમરુપ્રસક્તસ્સબીજપૂરસ્સુભગોઽક્ષસૂત્રી ॥ ૨૪॥

બોધાનન્દમયી વિભોર્ભવભયપ્રધ્વંસકૃચ્છક્તય-
સ્તિસ્રસ્તાઃ પરિણામતશ્ચ વિવૃતિર્નિશ્શેષબીજસ્ય હિ ।
તત્પૂર્ણં પ્રકૃતિઃ કલાદ્યભિમુખી દીર્ઘાક્ષસૂત્રં મન-
શ્શમ્ભોરસ્ત્રનિકાય આગમપરૈર્જ્ઞેયઃ પરો નાપરઃ ॥ ૨૫॥

ઈશાનં સર્વાસાં વિદ્યાનામીશ્વરં ચ ભૂતાનામ્ ।
બ્રહ્માધિપતિં બ્રહ્મત્વાન્નિષ્કલરૂપં સદાશિવં નૌમિ ॥ ૨૬॥

તત્પુરુષં ભક્તાનાં શૈવજ્ઞાનપ્રદં મહાદેવમ્ ।
રુદ્રં શિવત્વસિદ્ધ્યૈ તત્ત્વપ્રેરકમહં વન્દે ॥ ૨૭॥

અથઘોરમઘોરં પશુપાશનિરાકરણં ઘોરઘોરતરમ્ ।
સર્વસ્માચ્છરણમહં શર્વં બહુરૂપિણં વન્દે ॥ ૨૮॥

વામં જ્યેષ્ઠં રૌદ્રં કલવિકરણં બલવિકરણં કાન્તમ્ ।
બલપ્રમથનં સર્વભૂતદમનં મનોન્મનમહં વન્દે ॥ ૨૯॥

સદ્યોજાતં સર્વજ્ઞં પ્રણતાનાં ભવભયાપહરમ્ ।
અતિભવયોજકમમલં ભવોદ્ભવં નૌમિ જગદધિપમ્ ॥ ૩૦॥

શ્રીમન્મૂલમનૂત્થનાદશિખયા બ્રહ્માદિસાદાશિવ-
સ્થાનત્યાગગતિક્રમોર્ધ્વવિલસદ્વ્યોમાન્તસંસ્થાય તે ।
બોધાનન્દમયાય સર્વવિભવે નિત્યાય વિશ્વાત્મને
શુદ્ધાયામલતેજસે ચ મહતે તસ્મૈ પરસ્મૈ નમઃ ॥ ૩૧॥

ચન્દ્રયુગ્મગુણાર્ધમાત્રતદર્ધતદ્દલષોડશ
વ્યુત્તરત્રિદશાબ્ધિષષ્ટિભુજઙ્ગમશ્રવણક્ષમા ।
દર્શનેષુકરાંશભાવમિતોન્મની પરમાસનં
યસ્ય તં પ્રણતોઽસ્મિ નિષ્કલમવ્યયં પરમં શિવમ્ ॥ ૩૨॥

આદિપઞ્ચમમૃત્યુભૂષણચન્દ્રખણ્ડગુણાશ્રદૃ-
ગ્ભાનુગધ્વનિસીરભાસ્કરસેન્દુવૃત્તહલાકૃતિઃ ।

સાંશુમત્રિશિખદ્વિબિમ્બગતદ્વિકુબ્જગ ઉન્મના
(સાંશુમત્ત્રિશિખદ્વિબિમ્બગતદ્વિકુબ્જગ)
    પાતુ વસ્સકલાપરસ્સકલાકલસ્સકલસ્શિવઃ ॥ ૩૩॥

નિષ્કલં શિવરુદ્રપુદ્ગલભૂષણાર્ધહિમાંશુમ-
    દ્રોધિદણ્ડતદન્તશક્તિચતુષ્ટયેશ્વરયોગિનમ્ ।
શઙ્કરં વસુસાગરાઙ્ગુલચારિણં રસશૂન્યગં
    સર્વમન્ત્રપતિં પ્રાસાદમહં નતોઽસ્મિ ષડધ્વગમ્ ॥ ૩૪॥

ચિદ્વ્યક્તિસંસ્થિત્યવલોકરોધૈર્મુદ્રોત્તરૈરઙ્ગશિવૈકભાવૈઃ ।
પાદ્યાચમાર્ઘ્યપ્રસવપ્રદાનૈસ્ત્વદર્ચનં જન્મફલં મહેશ ॥ ૩૫॥

આવાહનં સ્વાત્મનિ ચિત્પ્રકાશસ્તત્ર સ્થિતિસ્સ્થાપનમીશ્વરસ્ય ।
સાન્નિધ્યમાત્મેશ્વરસન્નિધાનં સંરોધનં સ્વસ્ય શિવે નિરોધઃ ॥ ૩૬॥

નમોઽસ્તુ સંજ્ઞાનહૃદે ભવાય નમો ગુણૈશ્વર્યવિશિષ્ટમૂર્તયે ।
નમોઽપરાધીનવશિત્વરૂપશિખાય તેજઃ કવચાત્મને નમઃ ॥ ૩૭॥

નમઃ પશૂનાં મલકૃતનક્ષમાસહપ્રતાપાસ્ત્રધરાય શૂલિને ।
નમોઽવિકારાય ષડઙ્ગમૂર્તયે સદાશિવાયામૃતરૂપિણે નમઃ ॥ ૩૮॥

સ્વભાવશુદ્ધસ્ય શિવસ્ય પાદ્યમાચામમાત્મીયવિશુદ્ધિહેતોઃ ।
અર્ઘ્યપ્રદાનં કુસુમાર્પણં ચ સદેશધામાપ્તિનિમિત્તમેતત્ ॥ ૩૯॥

સ્નાનં સ્વાત્મમલાપહં શુભમયૈર્ગન્ધૈસ્સમાલેપનં
    સદ્વસ્ત્રાભરણં સુગન્ધિકુસુમૈર્માલાભિરભ્યર્ચનમ્ ।
સાલઙ્કારસદાશિવસ્ય વિધિવદ્ધૂપપ્રદાનં ત્વણો-
    ર્ભોગાર્થં હિ સદેશધામ્નિ વિમલં દીપં શિવજ્ઞાનદમ્ ॥ ૪૦॥

શુચીશરક્તપાનિલેન્દ્રમૃત્યુકેન્દુસંસ્થિતાન્
    પયોધરાર્કવાતવહ્નિસન્નિભાનિનેક્ષણાન્ ।
યુગાનનાન્વરાભયત્રિશૂલશક્તિયુક્કરાન્
    નમશ્શિવાઙ્ગસમ્ભવાન્હૃદાદિમન્ત્રવિગ્રહાન્ ॥ ૪૧॥

ભોગાઙ્ગાર્ચનમાત્મનશ્શિવગુણપ્રાપ્ત્યર્થમૈક્યં પ્રભો-
    રઙ્ગાનાં પુનરર્ચકસ્ય શિવસંયોગાય શુદ્ધાત્મનઃ ।
તૃપ્તસ્યાન્નનિવેદનામ્બુમુખવાસાદિપ્રદાનં મન-
    સ્તૃપ્ત્યર્થં શિવભાવમઙ્ગલકરં ચિત્રં તવાર્ચાફલમ્ ॥ ૪૨॥ (તત્રાર્ચાફલમ્)

પવિત્રભૂતસ્ય પવિત્રદાનં તાપત્રયઘ્નં સકલાર્થસિદ્ધ્યૈ ।
જપશ્ચ ભક્ત્યા પ્રણતિશ્શિવસ્ય બ્રહ્મેન્દ્રવિષ્ણ્વાદિપદત્વહેતુઃ ॥ ૪૩॥

અર્ચને સકલં જપે સકલાકલં સતતોદિતં
    નિષ્કલં સકલાધ્વગં પરિપૂર્ણમાત્મસમર્પણે ।
વ્યોમ્નિ સુસ્ફટિકપ્રભં ભવને કલાસહિતં હરં
    યો હિ વેત્તિ પરં શિવં શિવ એવ સોઽસ્ત્ર ન સંશયઃ ॥ ૪૪॥

ભૂયઃપૂજનમીશસન્નિધિકરં સમ્પ્રાર્થનં સ્વેશયો-
    રન્યોન્યં ત્વવલોકનાય ભુવને ભોગાય સાદાશિવે ।
ઈશાગ્ન્યર્ચનમર્પણં ક્ષપયિતું બન્ધત્રયં કર્મણો-
    જ્ઞેયં સ્વાત્મનિવેદનં પરશિવે સ્થિત્યર્થમેવાત્મનઃ ॥ ૪૫॥

અશુદ્ધતત્ત્વૌઘબહિષ્ક્રિયાર્થે (આર્થં)
    પરાઙ્મુખાર્ઘ્યે પરમેશ્વરસ્ય । (પરાઙ્મુખાર્ઘ્યં)
યસ્મિન્નવસ્થાનકરં વિસર્ગે (વિસર્ગં)
    કુર્વન્સ શૈવં પદમભ્યુપેતિ ॥ ૪૬॥

વિપ્રોત્તુઙ્ગશ્ચોલદેશી ચ સૂરિ-
    શ્શમ્ભોઃ પૂજાસ્તોત્રમેતત્પવિત્રમ્ ।
સિદ્ધાન્તજ્ઞો જ્ઞાનશમ્ભુશ્શિવોક્ત્યા
    ચક્રે ભક્ત્યા ભુક્તયે મુક્તયે ચ ॥ ૪૭॥

ઇતિ જ્ઞાનશમ્ભુશિવાચાર્યપ્રણીતઃ શિવપૂજામૂલશ્લોકસ્સમાપ્તાઃ ।

Encoded by Dominic Goodall

Proofread by Dominic Goodall, Ruma Dewan

*Shiva Puja Stava*

pdf was typeset on September 7, 2022

Please send corrections to *sanskrit@cheerful.com*